श्रीगणेशायनमः श्रीगोपालकृष्णायनमः यद्दाग्विभूतिरमलाऽखिल
तत्त्वजातानानार्थतत्त्वममलंपरिबोधयंती श्रेयःकरोतिजगतांभगवंत
माद्यंश्रीमन्महर्षिकपिलंप्रभमाननोस्मि १ उद्दिधीषुस्तदुन्नीतसूत्रत
त्वार्थबुद्धये सर्वोपकारिणींकुर्वेटीकांगुणवत्तांवदः २ अथाज्ञानादि
क्लेशवासनासमुद्रनिपतितानाथदीनानुद्दिधीर्षुः परमकृपालुःस्व
तःसिद्धतत्त्वज्ञानमहर्षिर्भगवान्कपिलोहाविंशतिसूत्राण्युपादिक्षन्
सूचनासूत्रमितिहिव्युत्पत्तिः तत्रएतेःसमस्ततत्त्वानांसकलषष्टि
तंत्रार्थानांसूचनंभवति इतश्चेदंसकलसांख्यतीर्थमूलभूतं तीर्थी ॥१॥
तराणिचैतत्प्रपंचभूतान्येव सूत्रषडध्यायीतु वैश्वानरावतारभगव

त्कपिलप्रणीतेयंतु हाविंशतिसूत्रीतस्याअपिबीजभूतानारायणाव
तारभगवत्कपिलप्रणीतेतिरुन्द्धः तत्रादौप्रथमसूत्रत्रयेणसक
लप्रपंचमूलभूतानिपंचविंशतितत्त्वानीतिसूचयति अष्टौप्र
कृतयः १ षोडशविकाराः २ पुरुषः ३ अयमर्थःसांख्यशास्त्रं
तेपंचविंशतितत्त्वानि तत्रमूलप्रकृतिः १ महत्तत्त्वं २ अहंकारः
३ शब्दतन्मात्रा ४ स्पर्शतन्मात्रा ५ रूपतन्मात्रा ६ रसतन्मात्रा
७ गंधतन्मात्रा ८ चेत्यष्टौप्रकृतयःसंति अत्रतत्त्वांतरारंभकत्वं
प्रकृतित्वं अतश्चमहदादीनांसप्तानांपूर्वपूर्वविकृतित्वेपिनस्वति
लक्षणसमन्वयात् पंचबुद्धींद्रियाणिपंचकर्मेंद्रियाणिमनःगगन

सां० वृत्ति ॥२॥

पवनज्वलनसलिलधरण्याख्यानि पंचभूतानि चेतानि षोडशविका-
राविकृतयएव ननस्वांतरारंभकाणि सर्वैरप्यसाधारणमिति न्या-
यात् पुरुषः पंचविंशतितमंतत्वं अयंचन प्रकृतिर्नविकृतिः ताभ्यः
पृथक्त्वनिरूपणात् अनेनजडत्वपरिणामित्वकर्तृत्वादिधर्मबन्ध्यः
प्रकृत्यादिभ्यः पुरुषस्यवैलक्षण्यमपिसूचितं तथाचकारिका मू-
लप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु
विकारोनप्रकृतिर्नविकृतिःपुरुषः ॥ननु चेतेभ्योऽतिरिक्ताअन्ये
पिबहवोघटपटादयःपदार्थादृश्यंतेतत्कथमेषामुपपत्तिस्तत्राह ॥२॥
त्रैगुण्यसंचारः ४ त्रिगुणाएवत्रैगुण्यं सत्वरजस्तमांसितेषांसंचारः

मत्तकपोतकन्यायेनप्रतिक्षणंविलक्षणपरिणामोवर्ततइतिशेषः
अनेनमूलप्रकृतिस्त्रिगुणात्मिकात्रित्वेनचभेदबोधकेनगुणाःपर
स्परंविरुद्धस्वभावाःप्रीत्यप्रीतिविषदात्मकाः संचारेणच संगत
सम्यक्करणार्थमेतेषांनित्यंसहभावः पुरुषार्थेजननीयेकार्यानुसारे
णपरस्परसहायताच ततश्चप्रकृतेर्महदादीनांभूतेभ्योघटपटादि
सकलपदार्थानां त्रिगुणविलक्षणपरिणामादेवसंसिद्धिः कार्योत्
पादश्चनापूर्वः किंत्वाविर्भावमात्रं सूक्ष्मकारणरूपेणास्थितस्यस्थू
लकार्यक्षमरूपेणविपरिणतिः सत्प्रख्यातिवादश्चेत्येतेसिद्धांताः
संसूचिताभवंतीतिबोध्यं ४ ननुगुणानामनवरतपरिणतिस्वभा

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

सां० वृत्ति ॥२॥

वस्वात्कदाचिदपिद्रष्टृयजातादर्शनंनस्यात् ततश्चप्रलयोच्छेदःस्याद्
तआह प्रतिसंचरः ५ यथासृष्टिप्रक्रियानिर्वाहकस्त्रिगुणपरि
णामस्तथाप्रतिसंचरः सृष्टिप्रतिकूलोपिविपरिणामोस्ति तथाच
प्रतिलोमपरिणामेनतत्तत्कार्याणांस्वस्वकारणेलयेजातेत्रिगुणायाः
प्रकृतेःसाम्यावस्थयास्थितिरेवप्रलयइतिसूचितं तदाचसमान
परिणामत्वेनकेलक्षण्यान्नाविर्भावइतिभावः ५ अथजायमानस्य
कस्यदुःखादेर्विवेकार्थंत्रैविध्यंवक्तुमेकेनादावांतरमेवाह अध्या
त्मं ६ आत्मानमधिकृत्येत्यध्यात्मं तद्द्विविधं शारीरंमानसंचेति ॥२॥
शारीरंवातपित्तश्लेष्मवैषम्यनिमित्तं मानसंकामक्रोधलोभमोहे

र्ष्यविषयविशेषदर्शनादर्शननिमित्तं एतदुभयमपिआंतरोपाय
साध्यत्वादध्यात्ममित्युच्यते ६ बाह्यभेदद्वयमाह अधिभूतं ७
मानुषपशुपक्षिसरीसृपस्थावरादिभूतान्यधिकृत्ययत्तधिभूतमि
त्यर्थः ७ अधिदैवं ८ यक्षराक्षसविनायकग्रहाद्यावेशनिमित्तमे
तद्द्वयमपिबाह्योपायसाध्यत्वाद्बाह्यमित्युक्तं ८ ननुसत्त्वपिवि
क्षणेषुचहृषुपशार्थेषुपुरुषस्यतत्संबंधाभावात्कथंनतोदुःखमत
स्तत्सामग्रीं निरूपयिषुरादौबुद्धींद्रियाण्याह पंचाभिबुद्धयः ९
अभितोज्ञायंतेबुध्यंतेवस्त्वन्याभिरित्यभिबुद्धयः बुद्धींद्रियाणि
चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि रूपरसशब्दगंधस्पर्शबोधका

नि अनेनचक्षुरादिद्वारा विषयमात्रसंयोगः प्रदर्शितः ९ कृतिसाध्यानांक्रियाद्वारा योगं दर्शयितुं कर्मेंद्रियाण्याह पंचकर्मयोनयः १० पंचेंद्रियाणि कर्मयोनयः कर्मणांवचनादानविहरणोत्सर्गानंदादीनांयोनयः कारणानि तानिच वाक्पाणिपादपायूपस्थाख्यानि अनेनकर्मणांतत्तद्विषयसान्निध्येनतत्तत्संबंधः सूचितः १० अथमहदहंकारमनसामध्यवसायाभिमानसंकल्पासाधारणवृत्तयस्ताभिर्विनेंद्रियद्वाराविषयग्रहासंभवान्नेस्तद्धेतुत्वात्तासांनिरूपितप्रायत्वेनतत्साधारणिवृत्तिराह पंचवायवः ११ पंचसंख्याकाः प्राणापानसमानोदानव्यानाख्यावायवः महदहंकारमन ॥४॥

सांसाधारणवृत्तयोजीवनसाधनानि तत्र प्राणोनासाग्रहृन्नाभिपादांगुष्ठवृत्तिः अपानः कुकाटिकापृष्ठपायुपार्श्वोपस्थवृत्तिः समानोहृन्नाभिसर्वसंधिवृत्तिः उदानोहृत्कंठतालुभ्रूमध्यवृत्तिः व्यानस्त्वग्वृत्तिरिति ११ पंचानामुपयोगमाह पंचकर्मात्मनः १२ भक्तपीतास्वादितरसरुधिरादिभेदेनयथायथंप्रापणमेषांकर्मतदेकानुभेयत्वेनतत्स्वरूपाएतेइत्यर्थः १३ ननुभक्तज्ञानक्रियाद्वारामहदभिमानसंकल्पानांविषययोगित्वं पुरुषस्यत्वपरिणामितयानघटतइत्याशंक्यनिवर्तयिषुराह पंचपर्वाविद्या १४ अनात्मस्वात्मख्यातिरविद्यासाचविद्याविरोधिनीपंचपर्वाभवति तानिचपर्व

णि अविद्यास्मिता रागद्वेषाभिनिवेशाख्यानि पंचविपर्ययाः तथाच यदविद्ययाविपर्ययेणाबंधर्यतेवस्तु अस्मितादयस्तत्स्वभावास्तदभिनिविशंते ततश्चात्मनोऽविवेकेनतत्संबंधइतिभावः १३ पंचाशद्भेदेषुप्रत्ययसर्गेषुपंचविपर्ययानिरूपिताः अधुनाऽवशिष्टेष्वष्टाविंशतिमशक्तिराह अष्टाविंशतिधाऽशक्तिः १४ इंद्रियवधाएकादशबुद्धिवधाश्चसप्तदशइत्येतेअशक्तयउच्यंते इंद्रियवधायाधिर्यं १ कुणित्वं २ धत्वं ३ जडता ४ ऽनिघ्नत्वंतथा ५ मूकता ६ कोण्य ७ पंगुत्व ८ क्लैब्यो ९ दावर्त १० मंद्तोऽइति बुद्धिवधास्तुनवतुष्टीनामष्टसिद्धीनांचविपर्ययाद्भवंतिसप्तदश ॥५५॥

नदित्थंभूताअशक्तयोष्टाविंशतिधेति १४ प्रसक्तास्तुष्टिसिद्धिरेवाहाभ्यां नवधातुष्टिः १५ यथोक्ताआध्यात्मिकाश्चनवधाःप्रकृत्युपादानकालाभाग्याख्याः बाह्याविषयोपरमात्त्यंचैवंनवतुष्टयोभिहितास्तित्थंभूतस्यार्थः विवेकसाक्षात्कारोहिप्रकृतिपरिणामभेदः तंचसेवकरोतीतिकृतंतेध्यानाभ्यासेनेतिकेनचिदुपदिष्टं तन्नवतुष्टिः प्रकृत्याख्या १ अथप्रकृतेःसर्वात्मत्वविरोधान्नकेवलंतत्एववविवेकसाक्षात्कारःकिंतुप्रव्रज्ययेत्युपदिष्टतुष्टिरुपादानाख्या २ प्रव्रज्याकालविरोधादरण्येवविवेकेजातेनगृहेअलमुत्तप्तसंपन्नेइत्युपदिष्टतुष्टिःकालाख्या ३ भाग्येनैवविवेकख्यातिरिति

तुष्टिभोग्याख्या ४ इत्येताश्चतस्रः प्रकृतिव्यतिरिक्तमात्मानमधिकृ
त्यजायंतइत्याध्यात्मिकाउच्यंते विषयाःशब्दस्पर्शरूपरसगंधाख्याः
पंचतेषुअर्जनरक्षणभयाभोगहिंसादोषदर्शनेनततउपरमाविर
तयोपिपंच तेचमहदहंकारादीननात्मनआत्मनोभिमन्यमानस्य
वैराग्येणसमुत्पद्यंतेःतोबाह्याउच्यंतेइमाश्चनवउक्तविपर्ययाऽशा
क्तिभिःसहद्विचत्वारिंशत्सिद्धिपरिपंथित्वाद्धेयाः १५ अष्टधा
सिद्धिः १६ तद्यथाऊहःशब्दोध्ययनंदुःखविघातास्त्रयः कृत्वा
सिः शानंचसिद्ध्योष्टाविति तत्रोपदेशमंतरेणतत्त्वज्ञानस्यस्वय ॥६॥
मूहाख्याद्यासिद्धिः अन्यदीयशास्त्रपाठमाकर्ण्यज्ञानोत्पत्तौशब्दा

ख्याद्वितीया अध्ययनतस्तत्त्वज्ञानेतृतीया आध्यात्मिकाधिदैवि
काधिभौतिकदुःखत्रयविघातरूपाणांतिसृणांसिद्धीनांमुख्यत्व
इतरासांतदुपायत्वादौपचारिकत्वबोध्यं ऊहस्यातिदानंतस्यषष्ठं पंचवि
पर्ययाद्आरभ्याष्टसिद्धिपर्यंतमेतत्प्रत्ययसर्गः तेषुप्रकृतिप्रत्ययान्य
थारूपातिप्रेक्षाभिर्द्विचत्वारिंशादादितोहेयाःसिद्धयस्तूपादेयाः
इतितत्स्वरूपव्याख्ययैवसूत्रितंभवति ४८ प्रत्ययसर्गमभिधा
यप्रकृतिसर्गमाह इत्रामूलिकाथोः १७ इत्राअथोःपदार्थामूलि
काःसंतिमूलंप्रकृतिःपुरुषश्च तावाश्रयत्वेनविद्यतेयेषां अथ
वामूलंस्वभावःसमयोनकत्वेनास्त्येषामितिमूलिकामूलप्रकृतो

पुरुषेचविद्यमानादृतियावत् तथाचराजवार्त्तिकं प्रधानास्तित्वेमे
कत्वेमर्थवत्व २ मथान्यत्व ३ पारार्थ्य ४ त्वनर्थानेक्य ५ वि
योगो ६ योग ७ एवच शेषवृत्ति ८ रकर्तृत्वेमौलिकार्थाःस्मृ
तादृश अत्रैकत्वमर्थवत्वंपारार्थ्यप्रधानेभन्यत्वंप्रकृत्यपेक्षया
अकर्तृत्वंबहुत्वंपुरुषे अस्तित्वंयोगोवियोगश्चोभयोः शेषवृत्तिः
अंगांगिभावेनगुणानांवृत्तिःस्थूलसूक्ष्मशरीरयोरिति अत्रप्रकृ
तिपुरुषयोः साधर्म्यवैधर्म्यनिरूपणेनहयोःपार्थक्यज्ञानंप्रकृ
तिपुरुषान्यताख्यातिबीजमितिसूचितंभवति तथाचैतेषांध- ॥७॥
र्माणांनित्यस्वभावभूतत्वेनप्रकृतिसर्गइतिसर्गोव्यवहारइति
१७

ननुबुध्यादिभिरेवत्रिगुणात्मकैःसकलकार्यासिद्धेःकिमधिक
मभ्युपगम्यतेनाह अनुग्रहसर्ग १८ बुध्यादिभिःस्वकार्ये
जनयितव्येप्रकृतेरनुग्रहः सहायोपेक्ष्यते अन्यथाबुद्धिः क्षीणा
सतीनालमहंकारंजनयितुंमितिसकलोपिसर्गस्तदनुग्रहमूल
कएवेत्यर्थः अयमेवप्रकृत्यापूर्यतेत्युच्यते तथाचप्रकृत्येवायंस
र्गोनेश्वरेणनापिब्रह्मोपादानेनाप्यकारणेनेश्वराधिष्ठितप्रकृ
तिरितिसूच्यते १८ तन्मात्रसर्गमाह चतुर्दशविधोभूतसर्गः
१९ देवतिर्यग्योनमानुषभेदेनभूतसर्गश्चतुर्दशप्रकारकोभव
ति तत्रेशं प्राह १ प्राजापत्यं २ इ ३ पैत्र ४ गांधर्व ५

यक्ष ६ राक्षस ७ पैशाच ८ भेदेनाष्टविधोदैवः पशु ९ मृग १० पक्षि ११ स्थावर १२ सरीसृप १३ भेदेनपंचविधस्तैर्यग्योनः एक विधोमानुष १४ इति १९ ननुपुरुषार्थशिरोमणीभूतमोक्षतत्त्वाक्षाबंधस्वरूपज्ञानेसत्येवोपपद्यतेऽतोबंधानेवाह त्रिविधोबंधः २० विपर्ययाद्भूतत्वज्ञानाज्जायमानोबंधस्त्रिविधः प्राकृतो १ वैकृतो २ दाक्षिण ३ श्चेति तत्रपुरुषधियाप्रकृत्युपासनंप्राकृतो बंधः १ तथाभूतेंद्रियाहंकारबुध्युपासनंवैकृतः २ पुरुषतत्त्वम जानतःकेवलमिष्टापूर्तकारिणोदाक्षिणः ३ इतित्रयाणामपिपुरुषस्वरूपवेदकत्वाभावेनबंधकत्वं २० ननुवेतज्ज्ञानत्रयनिवृत्तौकी ॥८॥

दृशोमोक्षोजायतइत्याह त्रिविधोमोक्षः २१ इष्टापूर्तादिकर्मस्वसारतांपुरुषस्वरूपोपलब्धेरेवसारतांबुध्यमानस्यप्रथमः नतोभूतेंद्रियादिषुविकारतोऽन्यंस्वंआत्मानंजानतोद्वितीयः प्रकृतिमात्मविपरीतांप्रकृतेश्चपरंआत्मानंजानतः प्रकृतिपुरुषान्यंताख्यातिरूपस्तृतीयः २ यद्यपिप्रथमद्वितीयोनतात्त्विकमोक्षो तथाप्येकदेशिकान्यताख्यातिरूपबंधापगमेनमोक्षत्वव्यवहारइतिद्रष्टव्यं अत्रबंधमोक्षसंसाराःप्रकृतावेव नपुरुषे सवासनक्लेशकर्माशयानामपरिणामिनिपुरुषेऽसंभवात् तथाच भृत्यजयपराजययोःस्वामिन्युपचारवत् प्रकृतिगतानांबंधादीनां

सां॰सू॰वृ ॥९॥ पुरुषेउपचारएवभोगापवर्गयोः प्रकृतिगतयोरपिविवेकाग्रहात्पुरु
षसंबंधः सुसाधितोभवति एवंचधर्माधर्मौ ज्ञानाज्ञानेवैराग्यरा
गोऐश्वर्यानैश्वर्येइत्यष्टौपुरुषार्थनिमित्तभूतानिप्रकृतिरूपाणि
तत्रसप्तभीरूपैः प्रकृतिर्भोगापवर्गरूपपुरुषार्थंप्रत्यात्मानंबधा
ति तत्त्वज्ञानेनविवेकख्यात्याएकेनरूपेणमोचयतीतिईदृशस्य
तत्त्वज्ञानस्याभ्यासादरतेरंतर्यदीर्घकालसेवितात्सत्पुरुषान्य
तासाक्षात्कारिकेवलज्ञानमुत्पद्यतेतेनानादिरपिविपर्ययवासनाप्र
तिबध्यते ततश्चाध्यवसायाभिमानसंकल्पालोचनानिअंतराणि ॥९॥
बाह्याश्चसर्वेव्यापाराआसनिवृतिर्विद्धाभवंति अयमेवमोक्षइ

निरासांतः २१ ननुपुरुषप्रकृत्यादीनामलक्ष्याणांघटपटादीनां
मविलक्षणमेयाणांचलौकिकैः कथमनुभवोविधेयोतआह त्रि
विधंप्रमाणम् २२ असंदिग्धाविपरीतानधिगतविषयाचित्त
वृत्तिर्बोधश्चपौरुषेयःफलंप्रमातस्याःकरणंप्रमाणं तत्त्रिविधं
प्रत्यक्षानुमानशाब्दभेदात् एतेनाधिक्यान्युपमादीनिनैयायिका
द्यभ्युपगतानिप्रमाणानि एष्वेवांतर्भवंतीतिनातिरिक्तान्युप
युज्यंते तत्रार्थसन्निकृष्टमिंद्रियंप्रत्यक्षंव्याप्यव्यापकभावपक्ष
धर्मताज्ञानपूर्वकमनुमानंआप्तवचनादेरनादिरूपाच्छाब्दमि
ति विशेषतएषांलक्षणोदाहरणान्याकरादवसेयानीतिशिवं

श्रीः एकस्मिंस्त्रिगुणात्मतत्वयुक्तिर्नोज्ञानाद्विनासाध्यतो ह्यत्यंप्रा
प्यविकाशयत्यचिरतोः भोगापवर्गौस्वतः दृश्येवंपरिसूचयन्म
तिमतोमोहापहंकापिलंसूत्राणाममलंहिकथयमिवंदंजीया
च्चिरंचेतसि १ इतिसंक्षिप्तसांख्यशास्त्रकापिलसूत्रवृत्तिःसमा
प्ता ॥ अथसूत्रपाठः अथोपकृतयः १ षोडशविकाराः २
पुरुषः ३ त्रैगुण्यसंचारः ४ प्रतिसंचारः ५ अध्यासं ६ अधि
भूतं ७ अधिदैवं ८ पंचाभिबुद्धयः ९ पंचकर्मयोनयः १०
पंचवायवः ११ पंचकर्मात्मानः १२ पंचपर्वाविद्या १३ अष्टावि ॥१०॥
कल्पाः १४ नवधातुष्टिः १५ अष्टधासिद्धिः १६ दश

मूलिकार्थाः १७ अनुग्रहसर्गः १८ चतुर्दशविधोभूतसर्गः १९
त्रिविधोबंधः २० त्रिविधोमोक्षः २१ त्रिविधंप्रमाणम् २२
इतिकापिलसूत्राणि ज्ञेकात्यष्टिशकेमाद्रे काश्यांगोपालशर्मे
णा वृत्तिः कपिलसूत्राणामलेश्वरतुष्टये १ श्रीगोपीरम
णःप्रीयताम् ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017